# ॥ लिङ्ग-कामादि-सूत्राणि ॥

भर्गवः

## 1 ॥ सूत्र-पाठः ॥

अथ लिङ्ग-कामादि-सूत्राणि व्याख्यास्यामः । जीवसूत्राणुनाम् अनुक्रमेषु परिमेया विकारा जीवा-परम्पराया+अवश्यम् । जन्त्वोः संग्रामस् तस्य परमं कारणम् । तस्माद् अजायत जीवसूत्राणुनां व्यूढीकरणम् । RecA-नाम जीवकार्याणु-कुलं जीवसूत्राणुनां व्यूढीकरणं करोति । मुख्यशो ऽनग्निजीवसूत्राणुनाम् । अनग्निजीवसूत्राणु-मिथुनयोर् मैथुनात् । इदम् एव जन्तूनां मैथुनस्य रहस्यम् ॥

अनाभिकानाम् प्रनाभिकानां च+ अनग्निजीवसूत्राणुनाम् मैथुनं नैमित्तिका प्रक्रिया । नाभिकानाम् मैथुनं निरूपिता प्रक्रिया । व्यूढीकरण-द्विर्भावात् । तस्माद् अजायन्त लिङ्गानि । नाभिकेषु बहुशो लिङ्गे द्वे । केचिद् बहुलिङ्गानि प्रदर्शयन्ति । क्याकूनि युक्त-कामरूपिण रोमकोष्ठकाश् चेत्य् उदाहरणानि । एतेषु लिङ्ग-कोष्ठानाम् परिमाण-भेदो बहुशो नास्ति । द्विलिङ्गस्थितौ लिङ्ग-कोष्ठयोर् परिमाण-भेदः सदैवोदेति (सदैव उदेति) । महत्तरो लिङ्ग-कोष्ठः स्त्रीति (स्त्री+इति) । सा बहुशस् तिष्ठति । कनीयः पुमान् इति । स बहुशो गच्छति । लिङ्गकोष्ठानां निर्माणस्य दत्तांश-भेदाज् जायते लिङ्गयोः संग्रामः । किं तु परम्परा-सन्तत्यै विपरीतयोर् लिङ्ग-कोष्ठयोर् आकर्षणः संगमनं संयोगश् च+अवश्यम् । एतद्धि मूल-कारणं कामस्य । दत्तांश-संग्रामो ऽकर्षणश् च द्वयोः प्रतिध्राज्योः सम्मेलनाद् द्वयोर् एकः पूर्णं विजयं नापनोति । तस्माज् जायते ऽनन्ता स्पर्धा लिङ्गयोः ॥

बहुकोष्ठ-जन्तुषु लिङ्गकोष्ठा अन्येभ्यः कोष्ठेभ्यो भिन्नाः संवृताः । तस्माद् विविक्ता उपस्थाः । उदाहरणान्य् ओषधीषु पशुषु च । तेषु विपरीतानां लिङ्गकोष्ठानां सम्मेलनाय विविधा उपस्थ-लक्षणान्य् अवर्तन्त । शेपो योनिः पुष्पञ् चेत्य् उदाहरणानि । पशुषु त्रिविधा मैथुन-व्यवस्था । धृष्ट-व्रतम् बहुपत्नी-व्रतम् एकपत्नी-व्रतम् वा । बहुपत्नी-व्रतम् द्विविधम् । क्रमेण बहुपत्नयः सद्यो बहुपत्नयो वा । पृष्ठदण्ड-पशुषु प्रायेण २५ जीवसूचनाः प्रभवन्त्य् एकपत्नी-व्रतम् । Gibbons, orangutans, gorillas, chimpanzees and

bonobos ते सर्वे नृबन्धवः । अल्प-नृबन्धुष्व् एकपत्नीव्रतम् बहुशः प्रकृतिमत् । अन्येषु नृबन्धुषु बहुपत्नी-व्रतं च धृष्ट-व्रतं च सामान्यम् । मानवेषु च । प्रायेनेयं नृबन्धुनाम् मूल-स्थितिः । स्त्री-बलात्कारो रक्त-नृबन्धुनाम् एको मैथुनोपायः । रक्त-नृबन्धुनां वृष-जातिर् द्विविधा । नेमिवन्तश् च+अनेमिवन्तः । नेमिवन्त उग्रा धुनिमन्तश् च परस्परं युध्यन्ते च । अनेमिवन्तः शान्ताः प्रच्छनम् मैथुनं कुर्वन्ति च । भूरिरेताः पुमान् नित्यम् बहून् मैथुनावकाशान् मृगयते । स्वाण्डानां निषेकाय स्त्री सु-जीवसूचना-धारिणम् पुरुषम् प्रतीच्छत्य् अन्यान् निराकरोति च । तस्माद् बहुविधाः स्पर्धाश् च प्रदर्शनानि च ॥

मनुष्याणाम् प्रायेण सहजा व्यवस्था धृष्ट-व्रतं च क्रमेण बहुपत्नी-व्रतं च सद्यो बहुपत्नी-व्रतं च । लुब्धक-वनगोचरावस्थायां ते सर्वे ऽवर्तन्त । किं तु मनुष्यानाम् उपवासितायां स्थितेः प्रभूत्यास् ते सर्वे वैघ्नका अभवन् । कास्मत्? स्त्रीभ्यः परस्परम् पुरुषाणां नैष्ठिकात् संग्रामात् । इदं कारणं एकपत्नी-व्रतस्य+आवश्यकता ध्रुवायोपवासित-जीवनाय । किं तु मानवानां नेतृत्वम् प्रतिभा साहसं च नृद्रव्याद् उदियन्ति । अतः स्त्रीनियान-भेदो नृणां स्वाभाविकः । तस्य विरोधात् उपद्रवम् प्रवर्तितुं शक्नोति । परं तु शान्त्यै ध्रुवायोपवासित-जीवनाय च सर्वेभ्यो पुरुषेभ्यो न्यूनातिन्यूनम् एक-पत्न्या सह विवाहम् अवश्यम् । स्त्रीषु व्याभिचारिणी-व्रतम् भ्रूणहत्या +अधिपुरुषानुधावनं चेत्यादि प्रवृत्तीनां चोदनात् पुरुष-विषादोऽपि वर्धते । आधुनिकता नूतन-कृत्रिम-मानव-समाजस्य निर्माणं वा तानि सर्वाणि चोदन्ति । अतः प्रायेण + आधुनिकताः पौर-संस्कृतेः प्रतिष्ठाम् प्रतिरुन्धते । यदीदम् तत्वं तर्हि मनुष्याणाम् आधुनिक-पौर-संस्कृतिश् चिरायुर् नास्ति ॥

नमः सोमारुद्राभ्यां नमः प्रजापतये ॥

## 2 ॥ निघण्ठुः ॥

| | |
|---|---|
| जीवसूत्राणुः | nucleic acid molecule |
| अनग्निजीवसूत्राणुः | DNA |
| जीवकार्याणुः | protein |
| व्यूढीकरणम् | recombination |
| व्यूढीकरण-द्विर्भावः | meiosis |
| अनाभिकः | bacteria |
| प्रनाभिकः | archaea |
| नाभिकः | eukaryotes |
| क्याकु | fungus |
| युक्त-कामरूपिन् | plasmodial slime mold |
| कामरूपिन् | amoebozoan |
| रोमकोष्ठकः | ciliate |
| लिङ्गकोष्ठः | gamete |
| दत्ताम्षः | investment |
| बहु-कोष्ठ-जन्तुः | multicellular organism |
| जीवसूचना | gene |
| नृबन्धुः | ape |
| अल्प-नृबन्धुः | gibbon |
| रक्त-नृबन्धुः | orangutan |
| नृद्रव्यम् | testosterone |